संस्कृतवार्ता:
13.04.2025
प्रात: - 06:55

## प्रधानमन्त्री-हरियाणायात्रा

अम्बेडकरजयन्त्यवसरे प्रधानमन्त्री नरेन्द्रमोदी श्वः हरियाणाराज्यं प्रति याति। प्रधानमन्त्री तत्र हिसारतः अयोध्यापर्यन्तम् वाणिज्यिकविमानाय एकस्मै हरितध्वजम् प्रदर्शयिष्यति अपि च हिसार-विमानस्थानकस्य नूतनस्य रोहणाग्रभवनस्य आधारशिलां स्थापयिष्यति तदनु असौ यमुनानगरे अनेकासां विकासात्मकपरियोजनानाम् उद्घाटनं शिलान्यासं च विधास्यति अत्रावसरे उपस्थितं जनसमूहमपि सम्बोधयिष्यति। विमानयात्रां सुरक्षितम् अल्पमूल्ययुतम् समेषां कृते सुगम्यं च कर्तुं स्वप्रतिबद्धताम् अनुसरन् प्रधानमन्त्री हिसारक्षेत्रे महाराजा-अग्रसेन-विमानस्थानकस्य नवीनस्य अस्य भवनस्य आधारशिलां स्थापयिष्यति यस्य मूल्यं दशाधिकचतुश्शतकोटि- रूप्यकाणि यावदस्ति। प्रधानमन्त्री अत्रावधौ भारतमाला-परियोजनायाः अन्तर्गतं भूयोऽपि सप्तत्यधिकैकसहस्र-कोटि-रूप्यकाणां व्ययेन निर्मितायाः चतुर्दश दशमलव चत्वारि-किलोमीटर-परिमितायाः रेवाड़ी-उपमार्ग-परियोजनायाः अपि उद्घाटनं करिष्यति। अनया हि परियोजनया रेवाडीनगरे जनसम्मर्दः अल्पो भविष्यति अथ च दिल्ली-नारनौल-मध्ये प्रकल्पितः समयावधिः एकहोरां यावत् भविष्यति।

## अमितशाह-भोपालयात्रा

मध्यप्रदेशप्रशासनेन आयोक्ष्यमाणे एकस्मिन् कार्यक्रमे भागं स्वीकर्तुं केन्द्रीय-गृहमन्त्री अमितशाहः अद्य भोपालनगरं संप्राप्स्यति। दुग्धोत्पाद-सम्बद्धानां समेषां प्रमुखाणां हितधारकाणां प्रतिनिधयः अपि एकस्मिन् कार्यक्रमे भागं स्वीकरिष्यन्ति। अत्रावसरे मध्यप्रदेश-प्रशासनम् अन्यैःजनैः साकम् एकस्मिन् सहयोगात्मक-सन्धिपत्रे हस्ताक्षरं कृत्वा राज्यस्यास्य दुग्धोत्पादोद्योगाय एकं महत्वपूर्णं पदक्षेपम् उत्थापयिष्यति। अस्य सहयोगात्मक-सन्धिपत्रस्य निर्णयस्य घोषणा साम्प्रतिके एव समये मुख्यमन्त्रिणा मोहनयादवेन कृतासीत् । असौ निगदितवान् यत् अयम् उत्थापितः पदक्षेपः दुग्धोत्पादकानाम् आयसंवर्धनाय क्षेत्रे च दुग्धोत्पादनवृद्धये महत्वपूर्णो भविष्यति इति।

## पीयूषगोयलः

केन्द्रीय-वाणिज्यिकोद्योगमन्त्री पीयूष-गोयलः अद्य नवदिल्ल्यां यशोभूमि-सम्मेलन-केन्द्रे भारतस्य बृहत्तमायाः भवननिर्माण-सामग्रयाः वाइब्रेण्ट-बिल्डकॉन-इत्याख्यस्याः पञ्चविंशत्यधिक -द्विसहस्रतमवर्षीयायाः उद्घाटनं विधास्यति। ब्लूजोनद्वारा आयोजिते कैपेक्सिल-वाणिज्य-मन्त्रालयाभ्यां समर्थिते एतस्मिन् कार्यक्रमे सप्तविंशति-सहस्र-वर्ग-मीटरात्मके परिमाणे सार्धद्विशतसङ्ख्यकाः प्रदर्शकाः सप्तशताधिक-सङ्ख्यकाः वैश्विक-क्रेतारः

पञ्चाशत्सहस्रसङ्ख्यकाः च दैशिकागन्तुकाः सम्मिलिताः भविष्यन्ति इति अवगम्यते। एतस्मिन् एक्सपोकार्यक्रमे अमरिका-ब्राजील-मैक्सिको-देशान् समेत्य षष्टिदेशानां क्रेतारः समायान्ति।

## सर्वोच्चन्यायालयः

सर्वोच्चन्यायालयेन निर्णयः श्रावितः यत् राज्यपालैः प्रदत्तेषु राष्ट्रपतेः सहमतये आरक्षित-राज्य-विधेयकेषु राष्ट्रपतिना मासत्रयानन्तरमेव निर्णयः स्वीकरणीयः इति। शीर्षन्यायालयेन तमिलनाडुराज्यस्य राज्यपालस्य आर.एन.रवेः दशसु लम्बित-विधेयकेषु स्वीकृतिं नैव प्रदीयमानः निर्णयः निरस्तीकृतः अथ च एतस्यां प्रक्रियायां निर्णयोऽयं श्रावितः यत् राष्ट्रपतिना अपि राज्यपालेन निर्दिष्टानां विधेयकानां विषये निर्णयम् अधिगन्तुं मासत्रयात् अधिकः समयः नैव स्वीकरणीयः इति।

## मुर्शिदाबादहिंसाप्रकरणम्

मुर्शिदाबादनगरे सूचितायाः हिंसायाः दृष्ट्या केन्द्रीयगृहसचिवः गोविन्द-मोहनः पश्चिमबङ्गालप्रदेशस्य मुख्यसचिवेन आरक्षि-महानिदेशकेन सह दृश्याङ्कनमाध्यमेन संवादं साधितवान्। आरक्षि-महाननिदेशकेन ख्यापितं यत् परिस्थितिः चिन्तायुतास्ति परञ्च नियन्त्रणे अथ च कठोरनिरीक्षणे अपि अस्ति।

## आई.पी.एल.

आई.पी.एल. इत्येतस्यां विंशतिप्रतिविंशति-क्रिकेट-स्पर्धा-मालिकायाम् ह्यः रात्रौ हैदराबादनगरे जाते द्वन्द्वे सनराइजर्सहैदराबाद-दलेन पञ्जाब-किंग्स-दलम् अष्टस्तोभैः पराभूतम्। अद्य जयपुरे अपराह्णे सार्धत्रिवादने राजस्थान-रॉयल्स- रॉयलचैलेन्जर्स-बैंगलुरू-दलयोर्मध्ये सामुख्यं भविष्यति।

## धनुर्विद्या

धनुर्विद्याक्रीडायां ज्योतिसुरेखा-वेन्नम् ऋषभ-यादवयोः भारतीययुगलेन गतरात्रौ सेण्ट्रल-फ्लोरिडा-नगरस्य ऑबर्नडेल-स्थले धनुर्विद्या-विश्वचषकस्य प्रथमे चरणे मिश्रित-दलस्य स्वर्णपदकम् अवाप्तम्।

।। इति वार्ताः।।